# ॥ महामारी स्तोत्रम् ॥

देव्युवाच

पुरा ब्रह्मा तु मां सृष्ट्वा समाहूयाब्रवीद्वचः ।

शृणु मे वचनं पुत्रि कुरुष्वाथ च सादरम् ॥

कलौ जना दुराचाराः राजानश्च तथा विधाः ।

अतो गत्वा भुवं देवि मृत्युरूपा भवाज्ञया ॥

परद्रव्यापहर्तारः परस्त्रीनिरताः सदा ।

परपीडापरा नित्यं राजानस्युः कलौ युगे ॥

देवस्वहरणे सक्ता ब्रह्मस्वहरणे तथा ।

तेषां दोषवशात्त्वं तु जनान्संहर नित्यशः ॥

ब्रह्मणैवं समादिष्टा इन्द्रादिसुरसत्तमाः ।

भुवं समागता तत्र जनान् वीक्ष्याऽथ पापिनः ॥

राज्ञो दोषान् पुरस्कृत्य ग्रामे ग्रामे वसाम्यहम् ।

तत्रापि पापिनो हत्वा पुनर्ग्रामान्तरं व्रजे ॥

एवं देशानतीत्याहं सर्वान् संहृत्य वै जनान्।

पुनर्गच्छामि सदनं ब्रह्मणः परमेष्ठिनः॥

एवं मदागतिं ज्ञात्वा बुद्धिमान् पुण्यकृन्नरः।

विचार्य शास्त्रतो नित्यं जागरूको भवेदलम्॥

मदागमनलक्ष्यं तु शृणुध्वं विबुधा ब्रुवे।

पतन्ति मूषका यत्र नृत्यन्ति विरमन्ति च॥

तद्गृहं तत्क्षणं त्यक्त्वा सकुटुम्बो वने वसेत्।

तत्र शान्तिं प्रकुर्वीत महामायास्समीरिताम्।

जपित्वा च महामन्त्रं पठित्वा स्तोत्रमुत्तमम्॥

मनुः

ॐ नमो भगवति महामारिके मृत्युरूपिणि सकुटुम्बं मां रक्षस्व स्वाहा॥

पञ्चविंशाक्षरं मन्त्रं जपेत्तं भक्तिपूर्वकम्।

वने जलाशयं गत्वा ऊर्ध्वबाहुरधोमुखः॥

वीरासने चोपविश्य जपेन्मन्त्रं सहस्रशः।

संस्थाप्य प्रतिमां हैमीं धूपदीपोपहारकैः॥

संपूज्य विधिवत् पश्चाज्जुहुयात् प्रत्यहं नरः।

हरिद्राचूर्णमिश्रेण चित्रान्नेनाज्यसंयुतैः॥

समिद्भिः खादिरैर्भक्त्या ब्राह्मणैश्च समन्वितः।

पत्नीपुत्राप्तभृत्यैश्च जुहुयादनुवासरम्।

होमान्ते च पठेन्नित्यं स्तोत्रमेतज्जितेन्द्रियः॥

नमो देवि महादेवि सर्वलोकवशङ्करि।

सर्वदा सर्वतो मह्यं कृपां कुरु कृपाकरि॥

मेरौ कैलासशिखरे हिमाद्रौ गन्धमादने।

सदनप्रियकृते देवि मेदोमांसबलिप्रिये॥

महासैन्यसमायुक्ते सर्वप्राणिविहिंसके।

सर्वाभिचारिके देवि सर्वं रक्षस्व सर्वदा॥

यत्र कुत्र स्थले वापि यस्मिन् कस्मिन् यदा कदा।

रक्ष मां देवि स्त्रीपुत्रपशुभृत्यजनैर्युतम् ॥

माङ्गल्यं मङ्गळं देहि महामङ्गळदायिनि ।

लोकानामाश्रये सर्वमङ्गळे मङ्गळप्रिये ॥

इति स्तुत्वा महादेवीं भक्तिभावेन संयुतः ।

भुञ्जीत स्वजनैर्युक्तो देवीं मां मनसा स्मरन् ॥

काकशान्तिं ततः कृत्वा गृहं गन्तुमुपक्रमेत् ।

सुवासिनीं ब्राह्मणांश्च वस्त्रालङ्करणादिभिः ॥

संपूज्य भोजयेद्भक्त्या आशिषः परिगृह्य च ।

सुमुहूर्ते सुनक्षत्रे अलङ्कृत्य ततो गृहम् ॥

ब्राह्मणैर्बन्धुभिः सार्धं संविशेत् गृहमात्मनः ॥

स्वस्तिवाचं शान्तिसूक्तं द्विजवर्यैश्च कारयेत् ।

तेभ्यो वै दक्षिणां दद्याद्वित्तशाठ्यविवर्जितः ॥

ब्राह्मणान् भोजयेत्पश्चाद्देवीं मां प्रार्थयेद्गृहे ।

गच्छ गच्छ महादेवि स्वस्थानं मङ्गळं कुरु ॥

एवं कृतविधानेन मारिकाशान्तिरुत्तमा ।

जायते नात्र सन्देहो सत्यं सत्यं मयोदितम् ॥

इत्येतत्कथितं देव्या देवेभ्यः स्वात्मसम्भवम् ।

माहात्म्यं पठते यस्तु सोऽपि मङ्गळमाप्नुयात् ॥

लिखितं पुस्तकं यस्य गृहे तिष्ठति सर्वदा ।

तस्य मारीभयं नास्ति सत्यं सत्यं मयोदितम् ॥

पुस्तकं पूजयेद्यस्तु श्रद्धया परया मुदा ।

सोऽपि मङ्गळमाप्नोति इहामुत्रपरां गतिम् ॥

॥ इति वायुपुराणे महामारिकास्तोत्रम् ॥

|| mahāmārī stotram ||

devyuvāca

purā brahmā tu māṁ sṛṣṭvā samāhūyābravīdvacaḥ |

śṛṇu me vacanaṁ putri kuruṣvātha ca sādaram ||

kalau janā durācārāḥ rājānaśca tathā vidhāḥ |

ato gatvā bhuvaṁ devi mṛtyurūpā bhavājñayā ||

paradravyāpahartāraḥ parastrīniratāḥ sadā |

parapīḍāparā nityaṁ rājānasyuḥ kalau yuge ||

devasvaharaṇe saktā brahmasvaharaṇe tathā |

teṣāṁ doṣavaśāttvaṁ tu janānsaṁhara nityaśaḥ ||

brahmaṇaivaṁ samādiṣṭā indrādisurasattamāḥ |

bhuvaṁ samāgatā tatra janān vīkṣyā'tha pāpinaḥ ||

rājño doṣān puraskṛtya grāme grāme vasāmyaham |

tatrāpi pāpino hatvā punargrāmāntaraṁ vraje ||

evaṁ deśānatītyāhaṁ sarvān saṁhṛtya vai janān |

punargacchāmi sadanaṁ brahmaṇaḥ parameṣṭhinaḥ ||

evaṁ madāgatiṁ jñātvā buddhimān puṇyakṛnnaraḥ |

vicārya śāstrato nityaṁ jāgarūko bhavedalam ||

madāgamanalakṣyaṁ tu śṛṇudhvaṁ vibudhā bruve |

patanti mūṣakā yatra nṛtyanti viramanti ca ||

tadgṛhaṁ tatkṣaṇaṁ tyaktvā sakuṭumbo vane vaset |

tatra śāntiṁ prakurvīta mahāmāryāssamīritām |

japitvā ca mahāmantraṁ paṭhitvā stotramuttamam ||

manuḥ

om namo bhagavati mahāmārike mṛtyurūpiṇi sakuṭumbaṁ māṁ rakṣasva svāhā ||

pañcaviṁśākṣaraṁ mantraṁ japettaṁ bhaktipūrvakam |

vane jalāśayaṁ gatvā ūrdhvabāhuradhomukhaḥ ||

vīrāsane copaviśya japenmantraṁ sahasraśaḥ |

saṁsthāpya pratimāṁ haimīṁ dhūpadīpopahārakaiḥ ||

sampūjya vidhivat paścājjuhuyāt pratyahaṁ naraḥ |

haridrācūrṇamiśreṇa citrānnenājyasaṁyutaiḥ ||

samidbhiḥ khādirairbhaktyā brāhmaṇaiśca samanvitaḥ |

patnīputrāptabhṛtyaiśca juhuyādanuvāsaram |

homānte ca paṭhennityaṁ stotrametajjitendriyaḥ ||

namo devi mahādevi sarvalokavaśaṅkari |

sarvadā sarvato mahyaṁ kṛpāṁ kuru kṛpākari ||

merau kailāsaśikhare himādrau gandhamādane |

sadanapriyakṛte devi medomāṁsabalipriye ||

mahāsainyasamāyukte sarvaprāṇivihiṁsake |

sarvābhicārike devi sarvaṁ rakṣasva sarvadā ||

yatra kutra sthale vāpi yasmin kasmin yadā kadā |

rakṣa māṁ devi strīputrapaśubhṛtyajanairyutam ||

māṅgalyaṁ maṅgaḻaṁ dehi mahāmaṅgaḻadāyini |

lokānāmāśraye sarvamaṅgaḻe maṅgaḻapriye ||

iti stutvā mahādevīṁ bhaktibhāvena saṁyutaḥ |

bhuñjīta svajanairyukto devīṁ māṁ manasā smaran ||

kākaśāntiṁ tataḥ kṛtvā gṛhaṁ gantumupakramet |

suvāsinīṁ brāhmaṇāṁśca vastrālaṅkaraṇādibhiḥ ||

sampūjya bhojayedbhaktyā āśiṣaḥ parigṛhya ca |

sumuhūrte sunakṣatre alaṅkṛtya tato gṛham ||

brāhmaṇairbandhubhiḥ sārdhaṁ saṁviśet gṛhamātmanaḥ ||

svastivācaṁ śāntisūktaṁ dvijavaryaiśca kārayet |

tebhyo vai dakṣiṇāṁ dadyādvittaśāṭyavivarjitaḥ ||

brāhmaṇān bhojayetpaścāddevīṁ māṁ prārthayedgṛhe |

gaccha gaccha mahādevi svasthānaṁ maṅgaḻaṁ kuru ||

evaṁ kṛtavidhānena mārikāśāntiruttamā |

jāyate nātra sandeho satyaṁ satyaṁ mayoditam ||

ityetatkathitaṁ devyā devebhyaḥ svātmasambhavam |

māhātmyaṁ paṭhate yastu so'pi maṅgaḻamāpnuyāt ||

likhitaṁ pustakaṁ yasya gṛhe tiṣṭhati sarvadā |

tasya mārībhayaṁ nāsti satyaṁ satyaṁ mayoditam ||

pustakaṁ pūjayedyastu śraddhayā parayā mudā |

so'pi maṅgaḻamāpnoti ihāmutraparāṁ gatim ||

|| iti vāyupurāṇe mahāmārikāstotram ||

www.kamakotimandali.com